काञ्च्यामद्वैतिसभायां काश्यां पण्डितसभायाञ्च परिशीलितः शास्त्रार्थः-

द्वैतस्य अपूर्वत्वम्



प्रकाशिका

श्रीमन्माध्वराद्धान्तसंवर्द्धिनी सभा

श्रीभण्डारिकेरिमठ, उडुपि, बारकूर, द. क.

(All Rights reserved)

1959

Udipi Mutt Swami honoured

H. H Sri Shankaracharya, participating in the discussion summed up the exposition, and praised the erudition of the Swami of the Udipi Mutt,and presented him with an embroidered garment.

At the Dakshinamurthy Sannidhi, the concluding programme of Shanti Mantras and namaskaras were held.

Speaking on behalf of the Pundits, Mahamahopadhyaya Sri Ananthakrishna Sastri said that this year two pundits had brought prasadams (holy offerings)from Bhadrinath on the Himalaya.

Sri Pranthiyankarai Subramanya Sastrigal read the messages received.

Sri S. Vaidyanatha Ayyar Secretary of the Sabha, said the Sabha had grown and developed with the guidance of the Acharyas of the Mutt. He thanked His Holiness, and offered him a garland of 'Rudraksha' inset with two diamonds.

His Holiness speaking in Sanskrit, said that most of the Advaita works had been written by Sanyasins and the matter of preserving this literature fell on the pundits. Till now they had been preserving it amidst many difficulties. They did not do it for any pecuniary benefit. The people should enable them to continue in their efforts for the preservation of their literature.

There were people who differed from the Adwaitic school. They should cantact such persons, and try to appreciate the difficulties which made them and their predecessors secede from "our hoary and traditional fold of Adwaita".

His Holiness presented the Swami of the Upanishad Brahmendra Mutt, the president of the Reception Committee, with a garment of honour.

Mr K. Balasubramanya Ayyar M. L. A. addressing the meeting, said that sufficient remuneration should be given to the pundits for the work they do. What was now given was not suíficient. Formerly Hindu rulers encouraged, and maintained the Pundits, but now the responsibility had fallen on the people. They should come up in larger numbers and make provision for intensifying the activities of the Sabha, he added.

श्रीजगद्गुरुश्रीमन्मध्वाचार्यकरकमलसञ्जातश्रीसत्यतीर्थपीठाधिपतयः
श्रीमन्माध्वराद्धान्तसंवर्द्धकसभासंस्थापकाः श्रीविद्यामान्यतीर्थाः



श्रीविद्यामान्यतीर्थानां पुरस्ताद् विहिताञ्जलिः ।
राराज्यते राष्ट्रपतिः शालीनत्वं प्रकाशयन् ॥

श्रीमद्भनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ।

प्राथमिकं निवेदनम्

हायनद्वयात् पूर्वं शास्त्रसम्प्रदायप्रचारादिस्पृहणीयसत्संकल्पेन देशसंञ्चारप्रसङ्गेन पावनीं काञ्चीपुरीमभ्यागतान् श्रीमन्मध्वसम्प्रदायाचार्यं-श्रीभण्डारिकेरिमठाधिपतिश्रीविद्यामान्यतीर्थान् नैकशास्त्रार्णवकर्णधाराः मूर्तिमन्तः शमदमादय इव विभ्राजमानाः सौजन्यौदार्यवैदुष्यशेवधिभूताः श्रीकाञ्चीकामकोटिपीठाधीश्वराः श्रीशङ्कराचार्याः तदात्वे प्रवृत्तायामद्वैतिसभायां समुपजोषं समामन्त्रयन् । तदा विविधशास्त्रनिष्णाता धिषणानुगामिनोऽपि धिषणापुरस्कृता विबुधधुरीणास्तां सभामध्यासीना आसन् ।

ईदृश्यामनन्यसाधारण्यां देशकालसम्पत्तौ जङ्गमतीर्थयोरनयोर्महानुभावयोरेकत्र सन्निवेशो नूनं जिज्ञासापिपासाकुलान् जनान् ज्ञानगङ्गाप्रवाहेण पर्यप्लावयत्—इत्यत्र नास्ति विस्मयावसरः । 'तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता' इति भागवतभणित्यनुसारं महात्मनां भगवत्पराणां सञ्चरणं सम्मिलनं तीर्थाटनं वा न तावत् स्वप्रयोजनाभिसन्धिना; अपितु लोकोपकृतिप्रवणतयैव । मध्येसभमेतयोः सम्मिलनमपि 'श्रुतेऽत्यन्तासक्तिं' प्रकटयत् अस्माकं मननीयं कमप्यनुत्तमं विचारं प्रादुरभावयदिति वयं श्रीशङ्कराचार्याणामीदृक्प्रसङ्गमुपस्थापितवतां पुरः सत्यं महदाधमर्ण्यं बिभृमः । तत्र सभास्तारा विद्वांसोऽपि 'बुद्धेः फलमनाग्रहः' इति न्यायमनुरुद्ध्य यादृशीं विचारसरणिमन्वसरन्, सा नूनमनुकरणीयाऽवर्तत ।

ऐषमो वाराणस्यामपि विद्यायाः केन्द्रभूतायामीदृश एव शास्त्रार्थविचारः संवृत्तः । सर्वतन्त्रापरतन्त्रा वादिसंवननिपुणाः प्रेक्षावन्तोऽपि 'मधुरेण समारभ्य मधुरेण समापयेत्' इत्युक्तिं चरितार्थयन्तः सरसामेव शास्त्रार्थप्रक्रियां प्रादर्शयन् । अतस्तादृशे मधुरे प्रसङ्गेऽसन्निहिताः शास्त्ररसिका अपीदं विमृष्टं वस्तु श्रव्यविधयाऽप्याप्नुवन्त्विति सर्वमिदं यथायथं कन्नडभाषायां संकलय्य चिराय काशीमधिवसतां सहृदयप्रवराणां विद्वद्वरेण्यश्रीजितेन्द्रियाचार्याणां सविधे सश्रद्धालं सुरगिराऽनुवक्तुं सस्नेहनिर्बन्धमनुरुद्धास्ते तदन्वतिष्ठन्—इति माध्वराद्धान्तसंवर्द्धिनीयं सभा सकार्तज्ञ्यं तानभिनन्दति ।

विलम्बिसंवत्सरस्य
मार्गशीर्षबहुलषष्ठी,
कलकत्ता,
१-१-५६.

विपश्चिदनुचरः
कार्यदर्शी
मा. रा. सं. सभा, उडुपि. द. क.

श्रीसीतारामचन्द्राय नमः

यन्नामावर्तनं पुंसां भवे भविकसाधनम् ।
करुणावरुणागारं वन्देऽहं तं रमापतिम् ॥ १ ॥
श्रीविद्यामान्यतीर्थानां शङ्कराचार्यसूरिभिः ।
वर्षद्वयात् पूर्ववृत्तं काञ्च्यामद्वैतिसंसदि ॥ २ ॥
अपूर्वत्वं द्वैतवादे स्यान्न वेति कृतोदयम् ।
शास्त्रार्थं भाषया बद्धं समेषां विदुषां विदे ॥ ३ ॥
श्रीविद्यामान्यतीर्थानाम् आदेशं शिरसा वहन् ।
अनुवक्ति यथाप्रेक्षमाचार्याह्वो जितेन्द्रियः ॥ ४ ॥

कामकोटिपीठाधीश्वराः श्रीशङ्कराचार्याः—श्रीचरणाः ! तत्र भवन्तस्तावद् द्वैतशास्त्रे साधु कृतश्रमा इत्यस्माभिराकर्णितम् । तद् अद्धा श्रीमतां साक्षात्कारेण तथ्यम् इत्यस्मन्मनः संवदति । भवन्मुखादेको विषयः श्रवणगोचरीकरणीय इति वयमभिकाङ्क्षामः । यदि तं विषयं पुरस्तात् उपस्थापयेम चेत् भवताम् अन्यथा ग्रहो न भवेत् कचित् ?

भण्डारिकेरिश्रीविद्यामान्यतीर्थाः—इदं कदापि सम्भवेत किमु ? "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्थम् उपनिषत्सु समुद्घोषयन्तीषु सर्वदा मनुष्येण तत्त्वं परामृशता भाव्यमेव । तत्राप्यस्मादृक्षाणां संन्यासिनां "तद्धि तपस्तद्धि तपः" !! तस्मात् श्रीचरणभाषितं सूक्तमेव वर्तते । अवश्यमेव श्रीमन्मनोगतं समक्षम् उपक्षिप्यताम् । एवञ्चेत् श्रीमन्निरूपणानुसारं वैचक्षण्येऽविद्यमानेऽपि यावदस्मद्बुद्धिप्रतिभातं विषयं विवेचयिष्यामः । एतत्सर्वम् ईदृशमनीषिसमागमे यद्यलब्धास्पदं तदा कुत्र वाऽन्यत्र प्रसक्तिमासादयेत् ? किञ्च 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्' इति भणितिरप्यनेन चरितार्था भवेत् ।

श्रीशङ्कराचार्याः—बाढम् , बाढम् , तथ्यमेव श्रीचरणा आचक्षत । महदिदं प्रमोदस्थानम् । साम्प्रतं 'अप्राप्ते शास्त्रमर्थवत्' इत्युक्ते प्रमाणान्तरानधिगतम् एकम् अपूर्वम् अर्थम् अधिगमयन्ति वेदादिशास्त्राणि सार्थकानि ननु ? एवं गते वस्तुनि वेदादिशास्त्राणि पञ्चभेदात्मकं

द्वैतं यदि प्रतिपादयेयुः, तर्हि 'अपूर्वोऽर्थः प्रतिपादितः'–इति तु न स्यात्। यतो हि इदं द्वैतं (पञ्चभेदरूपं) शास्त्रनिरपेक्षं प्रतिस्वम् अनुभवसिद्धमेव वर्तते। 'नाहमस्मि जडः, नाप्यहमीश्वरः,' इति को नाम न प्रत्येति? आदिशङ्कराचार्यव्याह्रियमाणं जीवब्रह्मैक्यं तावदनुभवपथातिगम् अपूर्वं वस्तु विद्यते। इदं यदि वेदशास्त्राणि बोधयन्ति चेत् तदैव केवलं तेषां सार्थक्यं सूपपादं भवेत्। तस्मात् वेदादिशास्त्राणि द्वैतपराणि [1]नभवन्ति अद्वैतमेव प्रतिपादयन्ति—इति ते स्वग्रन्थेषु समाचक्षते। एतस्मिन् विषये भवतां द्वैतवादे किं समाधानम् अभ्यधुराचार्याः?

विद्यामान्यश्रीचरणाः—द्वैतं नाम पञ्चभेदात्मकम् इति किलाख्यायि? तच्च जीवेश्वरभेदः, जीवजीवभेदः, जडेश्वरभेदः, जडजडभेदः, जडजीवभेदः—इति भेदपञ्चकं सङ्गिरन्ते। अत्र तावत् प्राथमिकस्य जीवेश्वरभेदस्यापूर्वतां विमृशामः। अयं भेदः प्रत्यक्षसिद्धो न भवति, अस्माकं जीवेश्वराणां प्रत्यक्षाविषयत्वेन तद्गतभेदोऽपि प्रत्यक्षो भवितुं न क्षमते। जीवस्य 'अहम्'-प्रत्ययगोचरत्वेन (साक्षिविषयत्वेन) प्रत्यक्षतायामपि ईश्वरस्य अनुभवाविषयत्वेन जीवेश्वरभेदः प्रत्यक्ष इति सेद्धुं नार्हति।

श्रीशङ्कराचार्याः—सत्यम्, भेदावगमनार्थं जीवेश्वरज्ञानं जातं चेत् अलम्, जीवस्य तु 'अहम्' इत्यनुभवोऽस्तीति भवन्त एवाऽऽचक्षते। ईश्वरस्य त्वप्रत्यक्षत्वेऽपि अनुमित्या स प्रत्येतव्यः। युक्त्या पुनः 'ईश्वरः सर्वकर्ता' इत्यनुभवात् जीवस्य चासर्वकर्ता—इति सिद्ध्या तयोर्भेदः शास्त्रनैरपेक्ष्येण सिद्धः—इत्येव संवृत्तं खलु? तस्मात् भेदं यद्वा द्वैतप्रपञ्चं प्रत्याययितुं शास्त्रं न प्रवर्तेत। (अथवा भेदस्यापूर्वत्वाभावः)

विद्यामान्यश्रीचरणाः—युक्त्या ईश्वरः सिद्धयेत् चेत् श्रीचरणोक्तं सङ्गच्छेत। तदेवेषद् विचारास्पदम्, 'नैषा तर्केण मतिरापनेया' 'शास्त्रयोनित्वात्' इत्यादिश्रुतिसूत्रेषु 'ईश्वरः केवलं सच्छास्त्रैकाधिगम्यः, तर्केण (युक्त्या) स निर्णेयतां नार्हति—'इत्यामनन्ति। श्रीशङ्कराचार्या अप्येतस्मिन्

---

१ नञर्थकनिपातनकारेण क्षत्रन्तभवद्-इत्यस्य 'सुप्सुपे'ति समासनिष्पन्नमिदं प्र०ब०।

विषये एतादृशश्रुतिसूत्रयोः अस्मदुक्तम् अभिप्रायमेव आविरभावयन्। एवं स्थिते युक्त्या तावदीश्वरस्य ज्ञानं दुःसम्पादमेवेति एतदर्थं शास्त्राण्येव शरणीकरणीयानि।

श्रीशङ्कराचार्याः—सत्यम्, आस्तां तावद् जीवेश्वरभेदस्तथा। अवशिष्टानाम् अपूर्वता-विचारं प्रवर्तयामः। जीवयोः परस्परं भेदस्त्वनुभववेद्यः खलु ?

विद्यामान्यश्रीचरणाः-मा मैवम्, साम्प्रतं देहा भिन्नाः, तदभ्यन्तरवर्तिनो जीवाश्च भिन्नाः। अनेके देहा यद्यप्यस्माकं लोचनगोचराः। तथाऽपि तद्देहान्तःस्थिता जीवा नास्माकं प्रत्यक्षाः (तद्विषयकं प्रत्यक्षं नास्माकं वर्तते)। यदा सर्वेऽपि जीवा एव नास्माकं प्रत्यक्षसिद्धाः, तदा तद्गता भेदाः कथंकारम् अस्माकं प्रत्यक्षसिद्धाः सम्पद्यन्ताम् ?

श्रीशङ्कराचार्याः—जडानां सर्वेषां नः प्रत्यक्षसिद्धत्वात् एतद्भेदाः प्रत्यक्षसिद्धा एव। तस्मात् जडभेदस्य (जडप्रतियोगिकभेदस्य) अपूर्वत्वाभावात् शास्त्राणां तत्प्रतिपादनमनावश्यकं किल ?

विद्यामान्यश्रीचरणाः—जडा इत्युक्ते केवलमस्माकमक्षिलक्ष्या एव न सन्ति ते। अस्मत्प्रत्यक्षागोचरा निर्मर्यादा अथवा संख्यातिगा जडपदार्थाः सन्ति। चतुर्दशसु विष्टपेषु वर्तमाना जडपदार्थाः केवलमेकेन सर्वज्ञेनैव गम्याः। पुण्यपापानि त्वतीन्द्रियाणि जडवस्तूनि सन्ति, अतस्तेषां भेदस्तावत् शास्त्राद्दते नैवावगन्तुं पार्येत। इत्थञ्च पञ्चभेदात्मकद्वैतस्य शास्त्रेतरप्रमाणाविषयत्वात् तत्रापूर्वता निष्प्रत्यूहैव। तस्मादेव द्वैतं शास्त्राणां मुख्यतात्पर्यविषय इत्यस्मत्सिद्धान्ते समर्थितवन्तः श्रीमदाचार्याः। तद्विमर्शे कृते स्वत एव समाहितिः भवेदित्यत्र न विचिकित्सावसरः।

श्रीशङ्कराचार्याः—वाक्यार्थगोष्ठी नाम पण्डितानां कोऽप्युत्सवः सा। अतो मन्ये अस्माकं केचिद् विद्वांसोऽपि वक्तुमुत्सहेरन्।

वि० श्रीपादाः—महदिदं प्रमोदास्पदम्। कृतविद्यानां तत्रैव विनोदः सम्भाव्यते। भवत्सत्कांङ्क्षां न वयं कदर्थयितुमीहामहे। विवक्षवो विपश्चितः श्रीचरणैरेव प्रकामं समादिश्यन्ताम्।

श्रीशङ्कराचार्याः—भोः अनन्तकृष्णशास्त्रिणः ! अमुं प्रकृतं विषयमेव

पल्लवयन्तो व्याहरध्वम्। (श्रीभण्डारिकेरिस्वामिपादाभिमुखं वीक्षमाणाः) एते तावत् संस्तुतचराः स्युः श्रीचरणानाम् ?

वि० श्रीचरणाः—आम्, अस्ति संस्तवः। इमे महामहोपाध्यायबिरुदालंकृताः खलु ? पूर्वं कालीघट्टमधिवसन्तोऽस्माकं चन्द्रिकादिग्रन्थान् यदा तदा विमृशन्त आसन्। लोके वेदे चेत्युभयत्र निष्णाताः। अस्मद्गजतपीठपुरम् (उडुपि)अपि समागमन्। इतः पूर्वमप्यस्माकमसकृद् वाग्विनोदाः संवृत्ता एवेति किमिमे नाभिज्ञायेरन् ? शास्त्रिणः ! श्रीचरणभणितिमनुरुद्ध्यास्मिन् विषये युष्मदाशयं कामं मण्डयत।

श्रीमदनन्तकृष्ण०—'नेह नानास्ति किञ्चन' इत्यद्वैतमभिदधानं श्रुतिवाक्यं द्वैतं प्रतिषेधति। मीमांसातन्त्रे 'विधिवाक्यात् निषेधशास्त्रं बलीयः' इति साधितत्वात् द्वैताद्वैतपरकवाक्यानां मध्ये विधायकद्वैतवाक्यापेक्षया द्वैतनिषेधकवाक्यान्येव बलीयांसि वर्तन्ते। तस्माद् वेदादिशास्त्राणाम् अद्वैत एव मुख्यं तात्पर्यमित्यौचित्यायातम्।

वि० श्रीचरणाः—भोः शास्त्रिणः ! श्रूयतां तावत्, एतत्पूर्वमीमांसान्यायानुसारं प्रवर्तिते व्याख्याने शून्यप्रतिपादकवाक्यमालम्ब्य ब्रह्मनिषेध एव वेदस्य मुख्यं तात्पर्यम्—इति कुतो वा नोच्यताम् ? दृश्यतां मनाक्—'सदेव सोम्येदमग्र आसीत्' इति प्रपञ्चसृष्टेः प्राक् ब्रह्मसत्ताप्रतिपादकं वेदवाक्यं विधिरूपम्, 'नैवेह किञ्चनाग्र आसीत्' इति जगत्सृष्टेः पूर्वं किमपि नाविद्यत इति व्याचक्षाणं वाक्यं ब्रह्मापि निषेधयत् शून्यमेव प्रतिपादयति,भवदुदाहृतन्यायेन साम्प्रतं शून्य(ता)प्रतिपादकवाक्यबलात् ब्रह्म नास्तीति वक्तुं साम्प्रतं किल ? शून्यमेव तत्त्वमित्यभ्युपगन्तव्यम्—इत्यापतेत्। इदमापादनं द्वैतमतप्रतिष्ठापकश्रीमदानन्दतीर्थभगवत्पादाः स्वीये श्री-विष्णुतत्त्वनिर्णयाभिधे ग्रन्थे महता सारस्येन प्रत्यपीपदन्।

श्रीमदनन्त०—'नैवेह किञ्चनाग्रे'-इतीयं श्रुतिः शून्यं कथं प्रतिपादयितुमीष्टे ? श्रुतिघटकम् 'अग्रे' इति पदं सृष्टेरर्वाक् वर्तमानं कालमभिधत्ते, कालाख्यस्य वस्तुनः सत्ताप्रतिपादनात् इयं श्रुतिः सर्वशून्यं प्रतिपादयितुं न क्षमेत। अयुक्तं चैतत्।

श्रीविद्यामान्यश्री०—सत्यं तत्, 'सदेव सोम्येदमग्र'-इत्येकमेवाद्वितीयं नामाद्वैततत्त्वम् अभिदधाने वाक्येऽपि 'अग्रे' इति पदं जागर्त्ति।

इदं पदमपि सृष्टेः प्राग्वर्तिनं कालमेव समाचष्टे। अद्वैतं नाम ब्रह्मातिरिक्तं किमपि वस्तु नास्तीति किलाभिप्रेयते? प्रकृते इदं वाक्यं ब्रह्मातिरिक्तं कालं सङ्किरते इति सिद्धे तदिदं वाक्यम् अद्वैतं (जीवब्रह्मैक्यं) प्रतिपादयतीति कथम् अद्वैतिनो मन्वते? यूयं वाऽत्र कथं नु सम्पन्नसमाधानाः?

श्रीमदनन्त०—तत् तावत् लोकसिद्धं कालमन्वाचष्ट, न पुनः कालविधानार्थं प्रावर्तत। यदि श्रुतिः कालं विदधीत तदाऽद्वैतस्य मनाक् प्रतीपा सम्पद्येत। 'कालः कालः' इति लोकाः कथयन्ति किल? तमेवानुवदन्ती श्रुतिः अद्वैतश्रुतेः ('सदेव सोम्येदमग्रे') किमपि वैरूप्यं नाऽऽधत्ते।

विद्यामान्यश्री०—इदं समाधानं अस्माकं यूयमेव प्रादर्शयत-इति खलु संवृत्तम्? 'नैवेह किञ्चनाग्रे' इति शून्यप्रतिपादकं वाक्यं लोकसिद्धं कालमेवान्ववदत्। तस्य कालविधाने तात्पर्याभावात् सर्वनिषेधे एव मुख्यं तात्पर्यम् इति सिद्धौ किं तावद् बाधकम्?

श्रीशङ्कराचार्याः—अनन्तकृष्णशास्त्रिणः! अनेके विपश्चितः सन्निहिता अत्र। एकेनैव द्राघीयान् अनेहा अतिवाह्येत चेद् अवशिष्टानां कृते समयो नितान्तं लघूभवेत्। अधुना प्रमुखा विद्वांसः श्रीसुब्रह्मण्यशास्त्रिणः किञ्चित् प्रस्तुवन्तु नाम। अपीदं रोचेत युष्मभ्यम्?

अनन्त०—यथा श्रीपादा आदिशन्ति, तथैवास्तां तावत्।

श्रीशङ्कराचार्याः—सुब्रह्मण्यशास्त्रिणः! अस्मिन् विषये युष्माकमप्याशय ईषत् प्रकाशमायातु। श्रीपादानामाक्षेपः कथं समाधीयेत?

श्रीसुब्रह्मण्यशास्त्रिणः—महामहोपाध्यायकथनानन्तरं यद्यपि नास्माकं किमपि वक्तव्यमवशिष्यते, तथाऽपि श्रीचरणानामाज्ञानुरोधेन मम प्रतिभासमानं यत्किमप्यावेदयामि—'नैवेह किञ्चनाग्रे' इति वाक्यं सर्वं निषेधतीति उडुपिस्वामिन आचक्षत। साम्प्रतं सर्वनिषेधः कुत्र क्रियताम? निषेधार्थम् अधिकरणं नापेक्ष्यते किमु? तच्चाधिकरणम् 'इह'—शब्देन प्रतिपाद्यते। यदीदमधिकरणमस्तीत्यभ्युपगम्यते तर्हि सर्वनिषेधः कर्तुं न पार्येत। अधिकरणानभ्युपगमे निषेधज्ञानस्याधिकरणज्ञानकारणकत्वात् सर्वनिषेधो दुःसम्पादः।

वि० श्रीचरणाः—श्रुतौ 'इह' शब्दप्रयोगबलात् इयं श्रुतिः सर्वनिषेधं कर्तुं न क्षमते इति प्रमुखाः पण्डिता अभिप्रयन्ति। परं सर्वनिषेधस्याधिकरणं सर्वनिषेधरूपं शून्यम् एवेति वयमाचक्ष्महे। इहशब्दस्तादृशं शून्यमेवाधिकरणमित्यभिधत्ते। भूतले घटनिषेधः भूतलस्वरूप इति मीमांसकाः कथयन्ति, तथैवाद्वैतिनः ब्रह्मणि जीवैक्यं ब्रह्मस्वरूपम्—इति व्याहरन्ति। ऐक्यस्य ब्रह्मातिरिक्तत्वोररीकरणे तत् मिथ्येति वक्तव्यम् आपतति, ब्रह्म एकमेव सत्यम्, तदतिरिक्तं सर्वं मिथ्येति अद्वैतराद्धान्तं किमर्थं ब्रूम इति चेत्, यथा भूतलस्थो घटनिषेधो भूतलस्वरूपः, यथा वा ब्रह्मगतं चैक्यं ब्रह्मस्वरूपम् तथैव शून्यगतः सर्वनिषेधः शून्यस्वरूप एवेति कथने का तावदनुपपत्तिः? शून्यरूपाधिकरणस्य सत्त्वात् 'नैवेह'—इति श्रुतिः सर्वनिषेधिका सम्भवेत् खलु? शास्त्रिणस्तु केवलम् अधिकरणमाक्षिपन्, वयं शून्यमेवाधिकरणम् इति प्रादर्शयाम।

श्रीमदनन्त०—मध्ये प्रसक्तमेकं वस्तु स्मर्यते, मनाग् अवसरो दीयताम्। शून्यवादिनो बौद्धाः शून्यं निषेधस्वरूपं नाभ्युपयन्ति। तत् 'चतुष्कोटिविनिर्मुक्तम्' इत्युक्ते भावत्वाभावत्वादिकोटिचतुष्टयं शून्ये नास्ति इति तेषां ग्रन्थे ते व्याहरन्ति।

वि० श्रीपादाः—ब्रह्मविद्याभरणाख्ये ह्यद्वैतिग्रन्थे ब्रह्मस्वरूपविमर्शनार्थं प्रवृत्ताः—ब्रह्म अभावस्वरूपम् अभ्युपगम्येत चेत् ब्रह्म शून्यं चैकमेव इति शंका त्वास्पदं लभेत। अद्वैतिभिः ब्रह्मणो भावत्वाङ्गीकारात् अद्वैत्युररीकृतं ब्रह्म शून्यरूपमेवास्ति इति वक्तुं नावकाशः—इत्यालिखन्। अस्मात् प्रघट्टकात् कतिचन बौद्धाः शून्यं निषेधस्वरूपमङ्गीचक्रुरिवेति सिद्ध्यति। शास्त्रिणः! प्राचीनाः समेऽपि सौगताः तत् नाभ्युपयन्तु नाम, यद्यर्वाचीनाः शून्यवादिनः 'सर्वनिषेधात्मकं शून्यं प्रतिपाद्यते' इति आचक्षीरन् तदा श्रीमद्भ्यः किमप्युत्तरम् आसादनीयं किल?

श्रीशङ्कराचार्याः—सुन्दरशास्त्रिणः! यूयमधुना विषयममुम् अग्रे नयत। श्रीचरणानां पूर्वमेते वृत्तपरिचया न कृताः। इमे 'महापण्डिताः' इति बिरुदावतंसिताः सन्ति। एते ह्यद्वैतसिद्धान्तमञ्जसा पर्यशीलयन्।

वि० श्रीचरणाः—हंहो ! सुन्दरशास्त्रिणः ! स्वाभिप्रायम् आविष्कुरुत । क्षत्रियाणां सङ्गरो यथा स्पृहणीयः, तथैव विदुषां वाक्यार्थगोष्ठी ननु ।

श्रीसुन्दरशास्त्रिणः—अस्मिन् सन्निवेशे अस्माकम् अवकाशप्रसञ्जनमेव नः परमं सौभाग्यम् । अत्यर्थं धन्योऽस्मि । सम्प्रति प्रकृते 'नैवेह किञ्चनाग्रे' इति वाक्ये शून्ये सर्वनिषेध आधातव्यश्चेत् 'शून्ये सर्वं वर्तते' इति प्राप्तिः खलु पूर्वमपेक्ष्यते ? दृष्टान्तविधया निवेदयामि—शुक्तिं दृष्ट्वा 'रजतम्' इति भ्रमदशायां केवलम् 'अत्र रजतं नास्ति' यद्वा 'नेदं रजतम्' इत्यभिधातुम् अवसरः प्रसज्जेत । 'अत्र रजतम्' इति प्रसक्तेरेवाभावे 'नेदं रजतम्' किंवा 'नात्र रजतम्' इति वा कोऽप्यकाण्डे न कथयति । एवमेव प्रकृते 'शून्ये सर्वमस्ति' इति भ्रान्तौ सत्यां श्रीचरणोदाहृतं 'नैवेह' इति वाक्यं 'शून्ये किमपि नास्ति' इति निषेधं विदधीत । ईदृक्षाया भ्रान्तेः कस्याप्यनुदयात् स्वात्मनैवोत्थाप्य निषेधे विधीयमाने अप्राप्त (अप्रसक्त) निषेधाख्यो दोषः समापद्येत—इति मे प्रतिभाति ।

श्रीशङ्कराचार्याः—सुन्दरशास्त्रिभिरापादितो दोष उपपन्नः खलु ?

वि० श्रीचरणाः—अद्वैतवेदान्तस्य सम्यक्परिशीलनात् अनायासेन ते इमं दोषमापादितवन्तः । परं हन्त ! अद्वैतमतेऽप्ययं दोषः सुदर्शतया भासते । श्रीचरणैर्विमर्शनीयं तावत्—'नेह नानास्ति किञ्चन' इतीदं श्रुतिवाक्यं निर्गुणे ब्रह्मणि अस्य प्रपञ्चस्य प्रतिषेधं विदधाति—इत्यद्वैतिनः समाचक्षते । निर्गुणे ब्रह्मणि प्रपञ्चोऽस्ति इति न तावत्प्रसक्तम् । तथाहि निर्गुणस्य ब्रह्मणः अप्रत्यक्षत्वात् तस्मिन् प्रत्यक्षप्रमाणेन प्रपञ्चो न प्रसज्जते । युक्त्या प्रसज्जते—इति वक्तव्यम्, युक्तेः कामचारितया युक्त्या प्रपञ्चस्य निर्गुणे प्रसक्तिरिव युक्त्यैव शून्येऽपि प्रपञ्चप्रसक्तेरवकाशः सुघटः । तस्मात् शास्त्रिभिरापादितः अप्रसक्तप्रतिषेधः स्वसिद्धान्तेऽप्यन्वेति । तत्र कथं ते विहितसमाहितयः सन्तीति नावगच्छामः ।

श्रीमदनन्त०—किं नाम चैतत् ?

वि० श्रीचरणाः—'किम्' इति प्रश्नं किमुद्भावयथ ? उच्यतां तावद् विवक्षितम् । सभा खलु पण्डितानां कृते 'उक्तिद्वारमपावृतम्' ।

श्रीमदनन्त०—'यस्मिन् पञ्च पञ्चजनाः' इत्यस्यां श्रुतौ निर्गुणे प्रपञ्चोऽस्तीति उच्यते। अनया श्रुत्या प्रसक्तं प्रपञ्चं 'नेह नानास्ति किञ्चन' इति श्रुतिः निषेधति। इत्थञ्च अद्वैतमते अप्रसक्तनिषेधरूपो दोषो नावसरं लभते।

वि० श्रीचरणाः—एतर्हि, बुद्धिपूर्वकं करं कर्दमे निमज्ज्य पुनस्तत्क्षालनं न खलु साम्प्रतम्? एतदपेक्षया 'दूरात् अस्पर्शनं वरं' किल? एवमेव श्रुतेः निर्गुणब्रह्मणि प्रपञ्चं वृथा प्रसञ्ज्य स्वयं निषेध-विधानापेक्षया तदप्रसञ्जनमेव वरीयः खलु? श्रुतिः स्वयं प्रसञ्ज्य तदनु स्वयं निषेधतीत्यत्र समुचितो दृष्टान्तोऽपि कोऽप्यपूर्व एव स्यात्।

श्रीशङ्कराचार्याः—श्रुतिप्राप्तं श्रुतिरेव निषिषेध—इत्यत्र दृष्टान्तः कोऽपि यदि भवेत् तदाऽस्यां संसदि विराजमानाः केऽपि मीमांसकास्त-माचक्षतां नाम।

मीमांसकाः संख्यावन्तः—'अतिरात्रे षोडशिनं गृह्णाति' इति श्रुतिः अतिरात्रयागे षोडशि-नामकभाण्डं स्पृशेत् इति स्पर्शनं विधाय 'नाति-रात्रे षोडशिनं गृह्णाति'अतिरात्रयागे षोडशिनं न स्पृशेत् इति निषे-धति। 'उदिते जुहोति' 'अनुदिते जुहोति' इत्यादीन्यनेकानि उदाहरणानि जाग्रति। अतः श्रुतिप्राप्तं श्रुत्यैव निषेध्यतामर्हति।

श्रीमदनन्त०—पण्डितैरीषदत्र अवधातव्यम्—भवद्भिहितान्यु-दाहरणानि न तावद् उपपद्यन्ते। अमीभिः श्रुतिवाक्यैर्विकल्पो विधीयते-अतिरात्रयागे षोडशि-पात्रं स्पृश्येत यद्वा नापि स्पृश्येत (नास्ति तत्रान्य-तरपक्षग्रहणे प्रत्यवायः) इति निर्णीतत्वात् एकवाक्यप्राप्तस्य वाक्यान्तरं निषेधकम्—इत्यत्र एतान्युदाहरणानि दृष्टान्ततां कथं तावदर्हेयुः?

वि० श्रीचरणाः—पूर्वमीमांसोदाहरणानि समुपस्थापितान्यपि श्रीशङ्कराचार्यसिद्धान्तस्य परिपन्थितामेव आदधते। यतो हि स्वब्रह्मसूत्र-भाष्ये 'स वा एष आत्मा नेति नेति' इति श्रुत्यर्थं पर्यालोचयन्तः श्रीशङ्करा-चार्याः श्रुतिविहितस्य श्रुत्या निषेधनं 'प्रक्षालनाद्धि पङ्कस्य' इतिन्याय-विरुद्धतया श्रुतिप्राप्तं ब्रह्म नेयं श्रुतिर्निषेद्धुं क्षमेत—इति सिद्धान्ततवन्तः। तस्मादस्मिन् प्रसङ्गे पूर्वमीमांसोदाहरणान्वेषणमकिञ्चित्करम्।

श्रीमदनन्त०—श्रुतितात्पर्यापरिज्ञानप्राप्तं श्रुतिर्निषेद्धुं प्रभवति किल ? 'इष्टापूर्तं मन्यमाना वरिष्ठं' इत्यस्यां श्रुतौ श्रुतितात्पर्यबोधेन प्राप्तं स्वर्गादिकम् अनूद्य निषिद्धयते ।

वि० श्रीपादाः—इत्युक्ते ?

श्रीमदनन्त०—इदमाकूतम् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति श्रुतेस्तात्पर्यं तावत् ज्योतिष्टोमादियज्ञानुष्ठानैः शुद्धान्तःकरणः सम्पद्य ब्रह्मज्ञानं सम्पाद्य बन्धनिवृत्तिरूपं महापुरुषार्थं सम्पाद्य धन्यो भविष्यतीति वस्तुस्थितिः । अत्र केचिद् भ्राम्यन्ति यत् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति श्रुत्या ज्योतिष्टोमयाग एव निरतिशयसुखसाधनभूत इति प्रतिपाद्यते । तामिमां भ्रान्तिमपाकर्तं 'इष्टापूर्तम्' इति श्रुतिः प्राप्ता । प्रकृतश्रुतेः द्वैतप्रपञ्चे तात्पर्यं नास्ति । इदमजानानानां वास्तविकं श्रुतितात्पर्यं बोधयितुं 'नेह नानास्ति किञ्चन'-इत्यादिश्रुतिवाक्यानि प्रवृत्तानि इति कथने किं तावद् बाधकम् ?

वि० श्रीचरणाः—द्वैतप्रपञ्चः श्रुतिप्रतिपादितोऽपि श्रुतेस्तत्र तात्पर्यं नास्ति—इति कथमवधार्यते ? वयम् उपक्रमे 'द्वैतं तावदपूर्वम्, अपूर्वताख्यतात्पर्यलिङ्गस्य सद्भावात् । द्वैतवाक्यानां द्वैतप्रपञ्चे तात्पर्यसद्भावे न किमपि बाधकम्'इति प्रागेव ससमर्थनम् अवोचाम । तस्मात् श्रुतितात्पर्यानवबोधप्राप्तं प्रपञ्चं 'नेह नानास्ति' इति श्रुतिः निषेधतीति कथनं न तावदुपपद्यते ।

श्रीशङ्कराचार्याः—सत्यम् ! सत्यम् !! अनन्तकृष्णशास्त्रिणः ! भण्डारिकेरिस्वामिभिः अपूर्वताख्यं लिङ्गं समर्थितचरम् । इतश्च यदीष्यते तदा उपक्रमादिलिङ्गानि विमर्शनीयानि । तानि निजसिद्धान्तग्रन्थेषु भूम्ना समर्थितान्येव । तस्मादिदानीम् एतं विचारम् उपसंहरामः । अयं विषयः सभास्ताराणां यथाऽवगतो भवेत् तथा द्राविडभाषया वयं सकृदनुवदामः । किञ्च अस्यां सभायाम् उडुपिश्रीपादानाम् आगमनमेकमपूर्वं वृत्तम् । एते महाप्राज्ञा इति कर्णाकर्णिकतया पूर्वं श्रुतमासीत् । सम्प्रति तथ्यमेवेदम् इति वयं युष्माभिः सममन्वभवाम । अतो मठाधीशाः पीताम्बरप्रावरणेन एतान् ससत्कारं समादियेरन्-इति निरणायि । पश्चादद्यतनः समारम्भः पर्यवसितो भवति—

इत्यभिधाय श्रीकामकोटिपीठाधीश्वराः श्रीशङ्कराचार्याः अद्य यावत्सम्प्रवृत्तं प्रत्येकं विचारं द्रविडभाषया समुपन्यस्य स्वामात्यकरेण पीताम्बरं परिधापितवन्तः श्रीभण्डारिकेरिश्रीस्वामिपादानाम्। उपरितनं सर्वमपि वृत्तजातं मद्रासनगरात् प्रकाश्यमानेषु 'हिन्दु'प्रभृतिषु आङ्गलवृत्तपत्रेषु अद्वैतसभाप्रबन्धकैरेव (२७,२८,२९।५६ मार्च) दिनत्रयेऽपि प्रकाशितचरम्।

श्रीरामभद्रः शरणम्

वाराणस्यां सम्पन्नः शास्त्रविचारः

सकलश्रुतिवाक्यानामभिधेयं परात्परम्।
ज्ञानानन्दघनं देवं रामचन्द्रमहं भजे॥
तीर्थयात्राप्रसक्तैस्तैर्विद्यामान्ययतीश्वरैः ।
काश्यां मध्वाश्रमे हूता ऐषमः पण्डिता मुदा॥
मार्गावलक्षपक्षस्य द्वितीयायां भृगोर्दिने।
तत्र प्रवृत्ता शास्त्रार्थमीमांसेयं वितन्यते॥

तत्र भवन्तोऽनन्तश्रीविभूषितश्रीमद्द्वैतप्रतिष्ठापनाचार्यजगद्गुरुश्रीमदानन्दतीर्थभगवत्पादाचार्योपदिष्टवीथ्येकपथिकभण्डारिकेरिमठाधीश्वरश्रीविद्यामान्यतीर्थश्रीचरणाः स्वसमाहूतायां पण्डितपरिषदि काञ्च्यां वृत्तचरं शास्त्रार्थमनूद्य समागतान् विद्वदग्रेसरान् 'इतोऽग्रे स्वप्रतिभासमानं शास्त्रविचारम् उपहरत'—इति सहजसूनृताभिर्वाक्परिपाटीभिः समावर्जयन्। तदा सन्निहितैः समैरपि विपश्चिद्भिराहितप्रातिनिध्या हिन्दुविश्वविद्यालयसंस्कृतशिक्षानिर्देशका नानाशास्त्रनिष्णाताः सुगृहीताभिधाः पण्डितमूर्धन्याः श्रीरामचन्द्रदीक्षितमहोदया इत्थं वक्तुमुपाक्रमत—

'नैवेह किञ्चनाग्रे' इति श्रुतिवाक्यशेषेण 'मृत्युनैवेदमावृतमासीत्' इति वाक्येन आवरकावृतात्रियमाणरूपपदार्थत्रयाभ्युपगमात् तत् 'नैवेह' इति वाक्यं शून्यं बोधयतीति वक्तुमसाम्प्रतम्।

श्रीचरणाः—शून्यवादिनोऽपि माध्यमिकाः—'संवृत्या शून्यमावृतम्' इत्यामनन्ति। तस्मात् प्रदर्शितो वाक्यशेषः शून्यवादस्य न कामपि क्षतिमावहति। किञ्च अद्वैतप्रतिपादकत्वेनाभिमते 'एकमेवाद्वितीयं ब्रह्म, तदैक्षत; नामरूपे व्याकरोत्' इति वाक्येऽपीक्षितृत्वादिद्वितीयवस्तुनः प्रतिपादनात् वाक्यशेषविरोधः अद्वैतवादेऽपि दुर्वारः। 'इदं कल्पितार्थानुवादमात्रम्' इतीदृशं समाधानम् उभयोरपि तुल्यम्।

श्रीदीक्षिताः—द्वैते ह्यपूर्वता नोपपद्यते। तथाहि—ईश्वरे शास्त्रेण सिद्धे प्रत्यक्षगोचरे जीवे त्वीश्वरप्रतियोगिकभेदः प्रत्यक्षसिद्धः सम्पद्यते। जीवे ईश्वरभेदस्य विद्यमानत्वात् 'ईश्वरो जीवभिन्नः' इतीश्वरगतो जीवभेदस्तावदनुमानसिद्धो भवति। तस्मात् प्रत्यक्षानुमानसिद्धे जीवेश्वरभेदे 'अपूर्वता वर्तते' इति वक्तुं न युज्यते।

श्रीचरणाः—प्रत्यक्षानुमानयोः ईश्वरग्राहकशास्त्रमूलकतया स्वतन्त्रशास्त्रेतरप्रमाणासिद्धत्वात् द्वैतस्य त्वपूर्वता तावदक्षुण्णा। "स्वबोधनीयपुरुषगताज्ञानविरोधिना स्वानुपजीविना मानान्तरेणाग्राह्यार्थकत्वम् अपूर्वत्वम्"—इत्यभिरूपरूपैः अपूर्वतास्वरूपं परिष्कृतं किल?

श्रीदीक्षिताः—तत् सत्यम्, श्रीचरणनिरूपणानुसारं द्वैतस्यापूर्वता यद्यपि प्राप्ता, परं 'यश्चार्थादर्थो न स चोदनार्थः' इति न्यायेन श्रुत्युपजीवकानुमानगृहीतो भेदः श्रुतिमहातात्पर्यविषयतां नाप्नुते।

श्रीचरणाः—ब्रह्मसूत्रशाङ्करभाष्ये सूत्रस्यार्थिकार्थभूत-बन्धमिथ्यात्वमपि सूत्रार्थ एव इत्याचक्षते। किञ्च 'यः भ्रमः स साधिष्ठानः' इति युक्त्या श्रुत्युक्तबन्धभ्रमाधिष्ठानत्वेन आत्मा गृहीतो भवति—इति अद्वैतिभिः अभ्युपगतत्वात् आत्माऽपि श्रुतिमूलकार्थिकार्थ एव विद्यते। एवं स्थिते तस्य आत्मनः श्रुतिमहातात्पर्यविषयत्ववत् श्रुत्युपजीवकानुमानसिद्धं द्वैतमपि श्रुतिमहातात्पर्यविषयतां कुतो नाश्नुवीत?

श्रीदीक्षिताः—अद्वैतराद्धान्तानुरोधात् तत्त्वमस्यादिवाक्यजन्यनिर्विकल्पकवृत्तिविषये शुद्धात्मनि श्रुतिमहातात्पर्यविषयता विद्यते। स च शुद्धात्मा प्रमाणान्तरवेद्यो न भवति। भ्रमाधिष्ठानत्वान्यथानुपपत्तिसिद्धे भ्रमाधिष्ठानत्वविशिष्टात्मनि श्रुतिमहातात्पर्यविषयतां नाभ्युपेमः, तथैव बन्धमिथ्यात्वेऽपि श्रुतिमहातात्पर्यविषयतां नाचक्ष्महे।

श्रीचरणाः—युष्माभिः श्रुतिमहातात्पर्यविषयत्वेनाभिप्रेतः शुद्धात्मा तत्त्वमस्यादिवाक्यजन्यनिर्विकल्पकवृत्त्यधिष्ठानभूतः, तस्मात्तादृशवृत्त्यधिष्ठानत्वेन सिद्धचरः सः। तस्य कल्पितवृत्त्यधिष्ठानतावत्त्वं तावदपरिहार्यम्। तथा च 'निर्विकल्पकवृत्तिः साधिष्ठाना, कल्पितत्वात्'—इत्यनुमानरूपमानान्तरसिद्धत्वात् तस्मिन्नप्यपूर्वता दुरुपपादा खलु ?

श्रीदीक्षिताः—वृत्त्यधिष्ठानत्वरूपेणानुमानगृहीत आत्मा अधिष्ठानत्वविशिष्टोऽस्ति, न तावत् स शुद्धात्मा। शुद्धात्मा तु निर्विकल्पकवृत्तिवेद्य एव। मानान्तरसिद्धो नास्ति सः।

श्रीचरणाः—शुद्धात्मा तत्त्वमस्यादिवाक्यजन्यनिर्विकल्पकवृत्तिवेद्य इति यूयं व्यवहरथ खलु ? 'अर्थं बुद्ध्वा शब्दरचना' इति न्यायानुरोधात् तमात्मानम् अबुद्ध्वा तद्विषयकं व्यवहारं कर्तुं यूयं न तावत् क्षमध्वे। यदि यूयमिदानीं तं जानीथ, तर्हि कथं मानान्तरावेद्यं तं वित्थ ? युष्माकम् अद्य यावत् तत्त्वमस्यादिवाक्येन निर्विकल्पकवृत्तिः न संवृत्ता किल ? अज्ञाननिवर्तिका सा निर्विकल्पकवृत्तिः यदि युष्माकमुदपत्स्यत, तर्हि साम्प्रतं वोऽज्ञानं नाभविष्यत्। तस्मात् शुद्धात्मानं व्यवहरन्तो यूयं निर्विकल्पकवृत्तिभिन्नेन मानान्तरेणैव तमवगच्छथ। इत्थञ्च तत्रापि शुद्धात्मन्यपूर्वता नास्तीति फलति।

श्रीदीक्षिताः—'घटमहं न जानामि' इति लोके व्यवहारो दृश्यते। अस्मिन् स्थले घटज्ञानं यदि स्यात्, तदा 'न जानामि' इति व्याहरणं न युज्येत। तथा चायं व्यवहारो घटज्ञानमन्तरैव प्रवृत्त इति प्रतिपत्तव्यम्। तद्वदेवायं मद्गतः शुद्धात्मव्यवहारोऽपि न तावत् ज्ञानपूर्वः।

श्रीचरणाः—'अर्थं बुद्ध्वा शब्दरचना' इति न्यायानुसारं 'घटं न जानामि' इति व्यवहारोऽपि ज्ञानपूर्वक इत्यभ्युपगम एव न्यायप्राप्तः। 'घटं न जानामी'त्यस्य घटविषयकवृत्तिज्ञानाभाववान् इत्यर्थोऽभ्युपेयः। घटविषयकवृत्तिज्ञानस्य साक्षिवेद्यत्वेन 'येनेन्द्रियेण या व्यक्तिर्गृह्यते तन्निष्ठा जातिः तदभावश्च तेनैव गृह्यते' इति न्यायेन घटविषयकवृत्तिज्ञानाभावोऽपि साक्षिवेद्यो भवति। तथा च घटविषयकसाक्षिज्ञानस्य तद्विषयकवृत्तिज्ञानेन समं विरोधाभावात् 'घटं न जानामि'-इति व्यवहारोऽपि ज्ञानपूर्वक एवेति पर्यवस्यति। इत्थं च शुद्धात्मविषयकं व्यवहारं

विदधानानां युष्माकं व्यवहारोऽपि शुद्धात्मज्ञानपूर्व एव भवेत् इति शुद्धात्मनः तत्त्वमस्यादिवाक्यजन्यनिर्विकल्पकवृत्तेः पूर्वमेव ज्ञातत्वात् तस्मिन् अपूर्वता दुरुपपादा।

एतावत्कालं समुपात्तजोषम्भावैः प्रेक्षावद्भिः शास्त्रार्थसमाकृष्टैः प्रसह्य प्रवक्तुमुपक्रान्तैः प्रश्नप्रतिप्रश्नाभ्यामपहारिताः श्रीदीक्षिता एतदकक्षीकृत्यैव प्रसक्तानुप्रसक्तं विषयमुपक्षिपन्त इत्थमाक्षिपन् 'जीवेश्वरभेदः स्वतन्त्रानुमानसिद्धो नास्ति; ईश्वरग्राहकश्रुतिमूलकानुमानबोध्य इति द्वैतस्यापूर्वता नाप्राप्ता'-इति व्याहरणं नोपपद्यते। यतो हि प्रत्यक्षानुमाने विषयान्तरे (भेदप्रत्यायने) श्रुतिमनुपजीवन्ती केवलं प्रतियोगिज्ञान-विषय एव श्रुतिमुपजीवत इति जीवेश्वरभेदस्यापूर्वता दुर्घटा। अत्र दृष्टान्तस्तावत् अग्निरनुष्णः पदार्थत्वात्—इत्यनुमानं यद्यपि प्रतियोग्युष्णत्वग्राहकप्रत्यक्षोपजीवि भवति। तथापि अग्न्यनुष्णत्वं प्रत्यक्षमूलकानुमानसिद्धमिति न व्यवह्रियते। प्रतियोगिग्राहकतयोपजीव्यस्य उपजीवकनिष्ठप्रामाण्यासाधकत्वमेव व्यवहारानुत्पत्तौ बीजम्, तथैव प्रतियोगिग्रहणमात्रे श्रुतिमुपजीवद्भ्यां प्रत्यक्षानुमानाभ्यां जीवेश्वरभेदस्य सिद्धत्वेन शास्त्रमूलकसिद्धत्वव्यवहाराभावात् तस्यापूर्वता न प्राप्ता।

श्रीचरणाः—भेदविषयकप्रत्यक्षानुमाने ईश्वररूपप्रतियोगिप्रत्यायनमात्रे श्रुतिं नोपजीवतः। भेदप्रत्यक्षं प्रति सर्वज्ञत्वासर्वज्ञत्वरूपविरुद्धधर्मज्ञानस्यापि कारणत्वात् तादृशधर्मज्ञानविषयेऽपि प्रमाणान्तरं श्रुतिमुखप्रेक्षि वर्तत एव।

श्रीदीक्षिताः—भेदप्रत्यक्षं प्रति विरुद्धधर्मज्ञानं न तावत् कारणम्, तत्र धर्मिप्रत्यक्षं प्रतियोगिज्ञानं चेत्युभे केवलम् अपेक्ष्येते।

श्रीचरणाः—यूयमेवं शास्त्ररीत्या ब्रूथ, उताहो स्वोत्प्रेक्षामात्रेण?

श्रीदीक्षिताः—अस्मदभ्यूहितम् इदम्।

श्रीचरणाः—भेदप्रत्यक्षं प्रति विरुद्धधर्मज्ञानस्य कारणत्वानभ्युपगमे 'इदं रजतम्'—इति भ्रान्तिप्रत्यक्षस्थले 'इदं रजतं न' इति भेदप्रत्यक्षं कुतो नाभूत्? शुक्तिरूपाधिष्ठानगतशुक्तित्वरूपविशेषधर्माज्ञानात् किल तत्राभेदभ्रान्तिः? विशेषाज्ञानमभेदभ्रान्तौ कथं कारणतामापद्यत? शुक्तित्वरूपरजतविरुद्धधर्मज्ञानस्य भेदप्रत्यक्षसामग्रीत्वेन भेदप्रत्यक्ष-

सामग्र्या अभेदप्रत्यक्षप्रतिबन्धकत्वात् प्रतिबन्धकाभावविधया विशेषाज्ञानं तत्र कारणतामुपगतमिति वक्तव्यम्। इत्थं च विरुद्धधर्मज्ञानरूपकारणाभावप्रयुक्तस्तस्मिन् स्थले 'इदं रजतं न'—इति भेदप्रत्यक्षाभाव इति सिद्ध्यति।

दीक्षिताः—इदं रजतम्—इत्याकारकभ्रान्तिप्रत्यक्षदशायां 'इदं रजतं न' इत्याकारकभेदप्रत्यक्षानुदयः किम्मूलक इत्याकाङ्क्षायाम् अभेदप्रत्यक्षरूपप्रतिबन्धकसद्भावात् इति ब्रूमः।

श्रीचरणाः—भेदप्रत्यक्षं प्रत्यभेदप्रत्यक्षस्य प्रतिबन्धकत्ववत् अभेदप्रत्यक्षं प्रति भेदप्रत्यक्षस्य प्रतिबन्धकत्वात् तस्मिन् स्थले भेदप्रत्यक्षसामग्री यद्यभविष्यत् तदा भेदप्रत्यक्षमेवोत्पन्नं सत् अभेदप्रत्यक्षं प्रतिबद्धं व्यधास्यत्। तथा कुतो नाभूत्? तस्मात् तत्र भेदप्रत्यक्षसामग्रीरूपस्य विरुद्धधर्मज्ञानस्याभावात् अभेदप्रत्यक्षसामग्र्या एव सत्त्वात् अभेदप्रत्यक्षमुदपद्यत—इति वक्तव्यम्। तथा च श्रुत्या केवलं प्रतियोगिप्रत्यायनमात्रस्याकरणात् भेदप्रत्यक्षकारणीभूतविरुद्धधर्मज्ञानस्याप्युत्पादनात् भेदः श्रुतिमूलकप्रमाणान्तरस्यैव गोचर इति सिद्ध्यति, न पुनः स्वतन्त्रमानान्तरसिद्ध इति भेदस्यापूर्वता निष्प्रत्यूहा।

मध्यस्था न्यायवाचस्पति-तर्ककेसरि-न्यायाचार्य-वामाचरण-भट्टाचार्या भेदप्रत्यक्षं प्रति विरुद्धधर्मज्ञानं कारणम् इति श्रीचरणसमर्थनं युक्तियुक्तमेवेति अन्वमोदन्त।

एतावति विचारक्रमे महतोऽनेहसः समतिक्रान्तत्वादुपस्थितैर्मनीषिभिः 'गुणैः सर्वत्रपदं निधीयते' इत्युक्तदिशा श्रीचरणेषु गरीयांसं श्रद्धाभरमाविष्कुर्वद्भिः काशीपण्डितसभातः श्रीचरणेभ्यो मानपत्रमुपनीय तदानीन्तनकार्यक्रमोपसंहारः प्रार्थित इति विद्वत्सम्भावनोत्तरं सभाविसर्जनं व्यधायि।

पश्चात् परेद्यवि विचारार्थमेवामन्त्रिता मीमांसाचार्या वेदान्तशास्त्रिणः हिन्दुविश्वविद्यालयमीमांसाप्राध्यापकाः श्रीरामचन्द्रेशास्त्रिषडङ्गाः—जीवेश्वरभेदः यथा श्रुतिमूलकप्रत्यक्षानुमानसिद्धो भवति न तथा जीवैक्यम्, जीवेश्वरभेदस्य श्रुतबोधनात् पूर्वमेव जीवेश्वरस्वरूपमवगम्यते। तदा जीवेश्वरयोः परस्परविरुद्धधर्मज्ञानात् प्रत्यक्षानुमानाभ्यां तयोर्भेदः

सिद्ध्यति। तदनन्तरं प्रवृत्ता श्रुतिः मुधैव, जीवेश्वरभेदप्रत्यायनवैफल्यात्। परं तत्त्वमसि वाक्यं तथा न भवति, तत् प्रत्यक्षानुमानासिद्धमर्थम् अभिधत्ते, अतस्तत्सार्थकं सम्पद्यते। तस्मात् तत्रैवापूर्वता सुगृहीता भवति।

श्रीपादाः—तत्त्वमसि-श्रुत्यैतदवबोधात् प्राक्तत्त्वम्पदार्थज्ञानमपेक्ष्यते। तत्पदार्थज्ञानं 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुतिभिराप्यते। तथा च तत्त्वमसिवाक्यादैक्यज्ञानात्पूर्वं तत्पदार्थभूतनिर्गुणत्वज्ञानस्य जातत्वात् तत् निर्गुणत्वं हेतूकृत्य 'चेतनः भेदरहितः, निर्गुणत्वात्' इत्यनुमानेन भेदाभावरूपैक्यस्य प्रथममेव ग्रहणात् तमर्थं बोधयन्ती तत्त्वमसि-श्रुतिः मोघा संवृत्ता खलु ?

षडङ्गशास्त्रिणः—अनुमानेन ऐक्ये ज्ञातेऽपि तदानुमानिकमैक्यज्ञानम् अज्ञानं न निवर्तयति। पार्ष्टिकं तत्त्वमसिश्रुतिग्राहितमैक्यज्ञानं प्रत्यक्षात्मकम्, तस्मात् तत् अनुमानानिवर्त्याज्ञाननिवर्तकतया अपूर्वताभाग् इत्याख्यायते।

श्रीचरणाः—तत्त्वमसिवाक्यात् प्रत्यक्षज्ञानमुद्भवति—इतीयं केवलमद्वैतिप्रक्रिया। अतः सर्वसम्प्रतिपन्नतया तु अपूर्वता दुरुपपादा। किञ्च प्रकृतेऽपि जीवेश्वरस्वरूपग्राहकप्रमाणमूलकसर्वज्ञत्वभावाभावानुमया जीवेश्वरभेदेऽनुमितेऽपि तदनु एकस्मिन्नेव वृक्षे संयोगभावाभावौ यथा दृश्येते तथा प्रकृतेऽप्येकस्मिन्नेव चेतने कुतो सर्वज्ञत्वभावाभावौ नावतिष्ठेयाताम् ?—इतीयं शङ्का ह्यनुमानानिवर्त्या। तामिमां शङ्कां प्रबलं श्रुतिप्रमाणं जीवेश्वरभेदं बोधयत् परिहरति। तस्मादत्राऽप्यपूर्वता नाप्राप्ता।

षडङ्गशास्त्रिणः—येषां विरुद्धधर्मवत्त्वानुमानात् परं पूर्वोक्तशङ्का नोत्पन्ना, तान् प्रतीयं भेदबोधिका श्रुतिः विफला खलु संवृत्ता ?

श्रीचरणाः—प्रतिशाखम् एकैवाऽऽत्मोपासना प्रतिपाद्यते। तत्प्रतिपादनं केवलं तत्तच्छाखाध्यायिनः प्रत्येव अपूर्वतामाधत्ते चेत् अलम्।

षडङ्गशास्त्रिणः—तत्त्वमसीति वाक्यं सर्वान् प्रत्यविशेषेण अपूर्वताभाक् इतीदमेव द्वैतवाक्यापेक्षया ह्यद्वैतवाक्ये वैशिष्ट्यम्।

श्रीचरणाः—सर्वान्प्रत्यपूर्वता खल्वकिञ्चित्करीति प्रागेवावोचाम। तथाऽपि ऐक्यस्य ईश्वरप्रत्यक्षसिद्धत्वेन ऐक्यबोधकवाक्यानां सर्वान् प्रत्यपूर्वता नास्त्येव।

एतावदाकपर्यं श्रीशास्त्रिणः सुतरां प्रसासद्यमानमानसाः श्रीचरणेषु हार्दमादरं हर्षोद्गारं च प्रकटयन्तस्तत्रैवोपसंहारं प्रार्थयन्त-इति ते श्रीस्वामिपादैः सम्भाव्य 'पुनर्दर्शनमस्तु नः' इति प्रेषिताः।

येषां शास्त्रार्थनैपुण्यं सूरयो वीक्ष्य विस्मिताः।
श्रीविद्यामान्यतीर्थास्ते क्रियासुर्मय्यनुग्रहम् ॥
श्रीपादमेधाकलितं ह्यपूर्वं शास्त्रार्थमेतं सुरभाषयाद्धा।
निबद्धय बद्धाञ्जलि नाथतेऽयं जितेन्द्रियः 'कृष्ण ! गृहाण चेदम्' ॥

॥ श्रीकृष्णार्पणमस्तु ॥

म० म० व्याख्यानवाचस्पतिप्रभृतिबिरुदावलीसमलंकृतश्रीगिरिधरशर्मचतुर्वेदमहोदयाध्यक्ष्ये वाराणसीयधर्मसंघेन समुपहृतं मानपत्रम्—

श्रीमन्महामहिम-महनीयोदारसार-पवित्रचरित्राणां विद्यानवद्यहृद्यहृदयानां वेदमार्गप्रतिष्ठापनप्रवणानां द्वैतवेदान्तप्रवर्तकाचार्याणामदूष्यवैदुष्यमासेदुषामनन्तश्रीविभूषितानां श्रीविद्यामान्यतीर्थमहाभागानां, करकमलयोः पुष्पाञ्जलिः

भण्डारकेरिमठमण्डनमार्यवर्यं प्राच्यप्रतीच्यविविधाध्वविदं शरण्यम्।
वन्द्यं महामहिममान्यमनन्यधन्यं वन्दामहे च महनीयमुदारहृद्यम् ॥ १ ॥
सद्द्वैतवीथीपथिकान् समर्थान् संभावयन्तं शुभसाधुभावैः।
धर्मार्थतत्त्वं सुसमादिशान्तं स्वाचार्यतीर्थं त्विह सन्नमामि ॥ २ ॥
दत्तं तपस्तुष्टहृदा जनन्या विद्याऽवनार्थं भुवनेऽवतीर्णम्।
विद्यावतारं गुरुतीर्थमेत्य को नाम विद्यालयतां न गच्छेत् ॥३॥

कारुण्यौदार्यराजज्यदनघमना यो जगज्जीवजातं
पाथेयैः स्वोपदेशैः पथिकयति सदा सत्पथे स्वानुभावैः॥
भूतेभ्यो मन्दमन्दस्मितमधुरिमभिः संप्रयच्छन्नभीतिं
श्रीविद्यामान्यतीर्थो जयति जितमहावैरिषड्वर्गदोषः ॥४॥

पत्रं पुष्पमिदं हृद्यं, धर्मसंघीयपण्डितैः।
समर्पितं महाभाग, समुरीक्रियतां विभो ॥ ५ ॥

वयं स्म भावत्काः—

मार्गशीर्षकृष्ण १३ — अखिलभारतवर्षीयधर्मसंघसदस्याः
सोमवारः सं० २०१५ वि० — धर्मसंघशिक्षामण्डलदुर्गाकुण्डवाराणसीस्थाः

[८—१२—१९५८]

श्रीविश्वेश्वरो विजयतेतराम्

श्रीमदाराध्यचरणानां परमहंसपरिव्राजकाचार्यवर्य्याणां यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाध्यष्टाङ्गयोगनिष्णातानां निखिलनिगमागमसारहृदयानां सर्वतन्त्रापरतन्त्राणां दिगन्तविश्रान्तयशसां तपोमूर्तीनां जगद्गुरुश्रीमद्द्वैतमतप्रतिष्ठापनपरमाचार्य-श्रीमन्मध्वाचार्यपीठाधिष्ठितानां दक्षिणकर्णाटकमण्डलान्तर्गतश्रीभण्डारिकेरिमठाधिपति–

श्री ११०८ श्रीमद्विद्यामान्यतीर्थचरणमहानुभावानां

सादरमिदमभिनन्दनम्

अयि श्रीमदाचार्यचरणाः !

सततान्तःस्थितात्यन्तचिन्तासन्तोपसन्ततिकृतान्तवेदान्तवृत्तान्तसन्ततप्रमुदितमानसानां श्रुतिस्मृतिपुराणप्रतिपादितविगीतसदाचारविचारप्रचारसकलान्तेवासिस्वान्तशान्तविधायिनां बुधजनमानसानन्दसन्दोहदायिनां समस्तसंस्कृतवाङ्मयमहोदधिपारङ्गतानां कलिमलकलुषिते विकरालेऽस्मिन् कलौ काले कवलितप्रायायामपि पवित्रक्षेत्रयात्राचर्चायां पारेसहस्रं क्रोशेभ्यः सुदूरं वाराणस्यामस्यां समागत्य चिराचरितप्राचीनाचार्यपरम्परामक्षुण्णां विदधतां तत्रभवतां भवतामनुकम्पासम्पादनमञ्जुलं समागममहोत्सवं समधिगम्य वयमद्य नितान्तं प्रमोदमावहामहे ।

विद्वत्सम्राजो महामान्याः !

आबाल्यादनुष्ठितनैष्ठिकब्रह्मचारिनियममहाध्वरसमाराधनबद्धपरिकराणाम् अधीतिबोधाचरणप्रचारणादिचतुर्विधोपाधेर्मूर्तिमत्प्रतीकानां प्राच्यविद्याप्रोज्जिजीविषयैद प्रत्यब्दं मठमहोत्सवावसरे शास्त्रार्थप्रतियोगितायां दक्षिणकर्णाटकप्रान्तीयेष्वसंख्येषु संख्यावत्सु प्राथम्यमधिगतवते धीरधिषणावधीरितेतरपक्षावलेपायापश्चिमविपश्चिते तथैव तत्रैव विद्वत्कल्पकल्पकेषु च्छात्रेष्वपि सर्वप्रथमोपस्थितायेति प्रत्येकं पञ्चसहस्ररूप्यकाणामेकैकां मुष्टिं वितरतां, न्यायवेदान्तादिगहनतरग्रतिसमाधेयतत्तद्ग्रन्थभेदनपराणां कुशाग्रशेमुषीकाणां भवतामादर्शभूतमद्भुतं वैदुष्यं श्रावं श्रावं तदेव पुनरद्य प्रत्यक्षं दर्शंदर्शञ्चास्माकं स्वान्तममन्दानन्दसन्दोहमहोदधावुन्मज्जननिमज्जनमनुभवतीत्यत्र नास्ति संशीतिलवोऽपि ।

वैक्रमपञ्चदशोत्तरद्विसहस्रमित–
मार्गशीर्षकृष्णद्वितीयायां वाराणस्याम्

श्रीमत्कगुणलुब्धाः
काशीपण्डितसभासदस्याः

॥ श्रीगुरुगौराङ्गौ जयतः ॥

उडुपि 'भाण्डारकेरी' मठाध्यक्ष-महामान्य-श्रीलविद्यामान्यतीर्थस्वामि-
महोदयानां कलिकाता-महानगर्यां शुभागमनोपलक्षे

अभिनन्दन-पत्रमिदम्

भोः स्वामिपादाः !

पुरा कदाचिदखिलभारतस्य तथाऽधुना प्रतीच्यवङ्गप्रदेशीय-राजधान्याम् अस्यां महानगर्यां भवतां शुभागमनमस्माभिः सादरमभिनन्द्यते । भारतीयदेवभाषायाः समुन्नति-विधाने भवतां साधुप्रचेष्टया तथा द्वैतसिद्धान्ताचार्य्यश्रीमन्मध्वस्वामिपादानामाविर्भावस्थल्याम् उडुपीनगर्य्यां "माध्वराद्धान्तसंवर्धिनी" सभा-प्रतिष्ठया च सविशेषं धन्यवादार्हा भवन्तः । अधुनाऽस्माकं राष्ट्रभाषा का भविता इत्याकांक्षायां संस्कृतभाषैव भविष्यतीति । यस्माद् भारतवर्षान्तर्गत-सर्वप्रदेशीयानामेव जनानामिमां देवभाषां प्रति सुदृढा श्रद्धा वर्तते तथा प्राक्तनाचार्यपादानां यत्किञ्चिदवदानमपि अस्यामेव भाषायां संरक्षितम् ।

अयि द्वैतविद्यापारगामिनः !

आचार्यपरम्परया वयं भवद्भिः साकं निबिडतमसंबन्धार्हाः । तत्र भवतां श्रीमतां मध्वाचार्यपादानां शिष्यपारम्पर्येणागतान् श्रीलक्ष्मीपतितीर्थपादानेव प्रेमभक्तिलतांकुराः श्रीमन्माधवेन्द्रपुरीपादाः संन्यासतः प्राग्दीक्षागुरुत्वेन वव्रिरे । तेषामपि शिष्यः प्रेमभक्तिकल्पलतायाः पुष्टांकुरः श्रील ईश्वरपुरीपादानेव गुरुत्वेन संवरितुं कामपि लीलामभिनिनाय । ततो वयं "ब्रह्म-माध्व-गौडीय"-सम्प्रदायनाम्ना भूषिताः । श्रीचैतन्यदेवोऽपि श्रीमध्वाचार्याणां मायावादखण्डन तथा श्रीकृष्णविग्रहस्य नित्यत्वं स्वीचकार ।

अस्माकं श्रीगुरुपादा हि श्रीचैतन्यमठस्य तथा श्रीगौडीयमठसमूहानां प्रतिष्ठातृचरणा आकरे "श्रीचैतन्यस्य" मठराजे श्रीमन्मध्वाचार्यपादानां श्रीविग्रहं संस्थाप्य नित्यपूजां संस्थापयामासुः । ढाकानगर्यामपि "श्रीमाध्वगौडीय' नामा मठो वर्तते । अस्मिन् वर्षे दाक्षिणात्यप्रदेशपरिक्रमाकाले 'उडुपी' नगर्य्यां भवद्भिर्या आतिथेयता प्रदर्शिता विशेषतः श्रीचैतन्यमठाचार्यपादान् यादृशं संवर्द्धयामासुर्भवन्तस्तेन वयं भवतां सकाशे चिराय कृतज्ञा इति शिवम् ।

श्रीचैतन्यमठस्य सेवकानाम्

कलिकातामहानगर्याम्, ४७२गौराब्दीयपुरुषोत्तमस्य सप्तदशदिवसे ।

Service to the Suffering Hindu

SRI SHANKARACHARYA'S APPEAL

(From A Correspondent)

KANCHEEPURAM. March 29, 1956.

"We the followers of Advaita school should love all people as we love our own selves. Atmavat Sarva bhutani.

"As part of our daily routine we should seek after anyone in trouble and try to serve him irrespective of his status in society caste, religion or race. The Pundits should set an example in the matter. When people see that the pundits in spite of their keeping up to the strict observance of sastraic acharas, practise this virtue they would begin to realise the truth of the bedrock of our socio-religious structure (i. e.) Unity in diversity. We should bear our own troubles with introspection of Vedanta and help others.

Thus observed His Holiness Sri Shankaracharya in the course of his address to the scholars and devotees assembled at the concluding sessions of the Diamond Jubilee Celebrations of the Advaita Sabha at Kanchi. on Sunday the 25th.

The Swami of the Bandarakere Madhwa Mutt of South Canara, an erudite scholar in Nyaya and Dwaita, was invited to the Sabha and introduced to the Pundits. H. H. Sri Shankarachrya of Kamakoti Peetha requested the Swami to elucidate the Dwaita texts bearing on the point generally raised by the Advaita texts that duality cannot be the revelation of the Vedas as it is experienced in everyday life even by the lowest strata of society.

The Vedas, according to the Advaita school can be Revelation only when their purport is such Truth as cannot be comprehended either by the perception of the senses or by inference, whereas the Dwaita school lays stress on five sorts of difference; which are matters of everyday experience. On this point, the Swami of South Canara elucidated the explanation given by Sri Madhwacharya in his famous work Vishnu Tatwa Nirnaya. He said that in as much as all material objects cannot be comprehended by a man. No ordinary man can have a knowledge of all objects in the universe. As between soul and soul no man can have knowledge of the existence of another soul because he can experience only his own self and as such he cannot differentiate one soul from another. In the same manner no ordinary man can differentiate between his and another's soul and all matter. God also can be neither experienced by the wenses nor can be deduced by dry inference. So difference between Him and soul and matter too cannot be the object of common experience.

Some points were raised for clarification by a few pundits present. He explained with thoroughness. The Swami's erudition and brilliance of exposition were much appreciated by the scholars assembled.

His Holiness Sri Shankaracharya of Kamakoti peetha commended the erudition and dignity of the Swami of the Udipi Mutt and honoured him with an embroidered garment.
